स्वप्नरघुवंशम्

(अक्षरः यतीन्द्रविमलचतुर्धुरीणविरचितम्)

(नान्दी)

स्मरारितनुशोभिनीं दुरितकोटिसंवारिणीम्
भवाब्धितरणे ~~अक्षमदुस्तरे~~ गतिं कमलकोमलाङ्घ्रीं वराम् ।
हिमाचलतनूजनिं सुरगणैकसंपालिनीम्
उमां पवनवासवानलनुतां स्मरामः शिवाम् ॥१॥

शिवा भद्रा स्वधा स्वाहा सर्वविद्यास्वरूपका ।
गौरी रूपयशोमाता यतीन्द्र सुतपालिका ॥२॥

(नान्द्यन्ते प्रविशति सूत्रधारः)

सूत्रधारः - अद्य खलु तावत् कलिकाता ~~कर्तृ~~ - - - वर्तृपक्षैरहमस्मि - महाकविं कालिदासस्य रघुवंशमहाकाव्यमवलम्ब्य रचितेन केनचिन्नवेन नाटकेन श्रोतृवर्गस्य विनोदनार्थम् । तस्मादस्माभिरिदं श्रीयतीन्द्रविमल ~~चतुर्धु~~ चतुर्धुरीणेन कृतं नवनाटकं स्वप्नरघुवंशमभिनेतव्यम् । आधुनिके काले ईदृशः ~~प्रय~~ प्रयत्नः समयोपयोगी इति न कश्चन सन्देहः । तथापि वर्षैः कालादनन्तरम् ईदृशी नवीना कृतिः प्रयोज्यते इति सर्वथा सावधानैरस्माभिर्भवितव्यम् । एवमपि प्रारम्भ एव प्रार्थितेयं यदि क्वापि काचन त्रुटिः परिलक्ष्यते सा सहृदयैर्जनैः सर्वथा क्षन्तव्येति ।

हन्त । एवमत्युग्रं श्रमं याचमानस्यापि मे न मुच्यते चिन्ताभारात् हृदयम् । कठोरा खलु चिन्ता तालुपर्यन्तं शरीरं शुष्कं, वदनञ्च शोणितहीनमिव

करोति। तथापि यदा अन्यस्य दुःखं चिन्ता वा चेतसा सम्यग् विभाव्यते तदा स्वकीया चिन्ता स्वकीयं दुःखं वा प्रायेण किञ्चित् लघु भवति।

अहो भाग्यम्, अहो भाग्यम्। यदि प्रथमः प्रसङ्गः प्रसन्नेन विधिना प्रेषितेव इह एनां याति अयोध्या-पुरीराजलक्ष्मीः।

तथाहि -

कुशावतीं नाम पुरीं विधाय कुशे गते तत्र तद्भक्तिभाजः।
अस्या अयोध्यापुरदेवताया दुःखन्तु मद्दुःखसहस्रगुणम्॥

इति प्रस्तावना।

स्वप्नरघुवंशम्

प्रथमोऽङ्कः

(ततः प्रविशति अयोध्यापुरीराजलक्ष्मीः शुष्यत्कण्ठतालुका चिन्ताकलुषितहृदया च)

राज्यलक्ष्मीः - अहो! अचिन्तनीयपूर्वा खलु मे अवस्था। सोऽयं सौरराजवंशः यस्य तुलना पृथिव्यामपि नासीत् सोऽयं शुष्यन्मध्यभागो विगलितपत्रपुष्पो द्रुम इव मे प्रतिभाति। अवमानिता खलु जननी सीता - सर्वेश्वरी आद्या शक्तिः करुणया मानव-शरीरं च्युतवतीमहता दुःखेन पातालान्तः पुरं गतवती च।

यस्या जन्मपरिग्रहेण जगदपि पुण्यमयं पूततरं वा बभूव वह्नेरपि या स्वतेजसा देदीप्यमाना शुद्धा च लोकापवादभयेन सा नारायणरूपिणा श्रीश्रीरामभद्रेणासीत् परित्यक्ता। भूयोऽपि तस्याः परीक्षा कर्तव्येति निर्णयं गतवति - प्राणनाथे रघुनाथे सा तामवमाननां सोढुं न शशाक।

अहो! महामहिमा देव्याः सीतायाः यामुद्दिश्य अद्यापि जगज्जनैः भक्तिपूतमानसैर्निगद्यते-

रघुनाथ-हृदयानन्द-चन्दनाचर्चसौरभान्।
नौमिसीतां जगद्वन्द्यां मुनिमानसवासिनीम्॥
चरणीसंभवां देवीं जन्मपूतवसुन्धराम्।
लावण्यमाधुरीसीमां सर्वलोकशुभङ्करीम्॥
जननी! कल्याणकारिणि! नौमि त्वाम्।
पतितानां पावनीत्वं विश्वबालुष्यनाशिनी॥
अग्निपरीक्षणं किं ते मातरग्निस्वरूपिणि॥
पातालान्तः प्रवेशो न, सुतमानसमन्दिरे।
मातस्तव चिरस्थानं देह्याशिषमनिन्दिते॥
जननी! सन्तापहारिणि! नौमि त्वाम्।
पञ्चवटीविहारिणीं पञ्चबेनाविद्यातिनीम्॥
अशोकवाननद्युतिमशोकामृतदायिनीम्॥
जननी! परात्परे! नौमि त्वाम्॥

एतादृश्यां चरन्तनगरे कुशो राज्यं शासति कुतो दुःखमिति? शृणु, कुशोऽद्यना कुशावतीमाधिवसतीति सैव नगरी राजधानी। - इत्येतो मे दुश्चरत्वा? तत् सुप्तमेनं प्रबोध्य स्वदुःखं विलापयामि।

(ततः प्रविशति सुघोतिथतः राजा कुशः)

कुशः:- (सहसा अदृष्टपूर्वां रमणीं विलोक्य सविस्मयम्) केयं स्वप्नचारिणीव अदूरे दृश्यते? जनाः सर्वे निद्रिताः दीपाः रात्रेर्मध्यभागोऽयम्। परन्तु प्रवासश्रम-क्लेशा अदृष्टपूर्वा केयं योषित्, कुतः कथं वा आगता? आदर्शतले छाया इव अनयोढ़ागतिः आगारेऽस्मिन् कथं वा प्रविष्टा?

राजलक्ष्मीः - जयतु जयतु महाराजः कुशः।

कुशः - देवि! सावरणोऽपि गेहे प्रविष्टोऽसि मृगाक्षिनी हैमगुपरागमिव आनिर्वृतानाम् आकारञ्च विभर्षि।

अयि शुभे ! का त्वम् ? कस्य वा पत्नी ? अत्र वा तव किं प्रयोजनम् ? सर्वम् आनुपूर्व्येण ब्रूहि ।

राज्यलक्ष्मीः - राजन् ! माँ तव श्रीविष्णोरवतारस्य पितृ-
[जनकवत्सलः] राज्यलक्ष्मीमेव हि ।

कुशः - भगवति ! अपि कुशलं ते ?

राज्यलक्ष्मीः - राजन् ! कुतो मे कुशलम् ? एकदा विभूत्या महिम्ना च अलकापुरीं निर्जित्य आसम् । अधुना तु अपरिमितदोषैः सत्यपि त्वयि सूर्यवंशे अहं तत्क्षणाम् अवस्थां प्राप्तवती । अद्यतेऽहं केवलमतीत गौरव-परिणी ~~हतभाग्येव~~ हतभाग्येव । मम आवासस्थलानि अयोध्यानगर्यां सर्वे सौधवर्या भग्ना जीर्णा अर्धा-पतिताः पतिता वा वर्तन्ते । तव पित्रा सार्धं विलयं गता मे सर्वा श्रीः । ~~गगनचुम्बीनां~~ गगनचुम्बिनीनां
च: धिनी मध्यभागेऽपि ~~कलकोलाहलवीथ्य~~ कलकोलाहल-
मुखरा/वीथयः सर्वा अधुना मध्याह्नेऽपि शृगालारव-
पूरिता वर्तन्ते । सज्जनहृदयस्थलीव स्वच्छप्रसन्ना-
स्थलम् इवते सलिला दीर्घिकाः सम्प्रति कर्दमावशेषा वन्यमहिष-
शृङ्गाहताः क्रोशन्तीव । नन्दनाननमधुना दण्डकारण्यं
जातम् । सरयूजलानि च रमणीनां रत्नानीव-
चूर्णसम्पर्कभावान्न सुगन्धीनि । तद् भवान्
इमां नवीनां वसतिं कुशावतीं विसृज्य कुलराज-
धानीम् अयोध्यां गन्तुमर्हति ।

कुशः - देवि ! भवति अयोध्याराज्यलक्ष्मीश्चेत् नूनं श्रुतास्मत्-
च:/ पूर्वपुरुषवृत्तान्ता रघुवंशनृपतिधुरन्धरामां कीर्ति
कीर्तिकलापानां प्रत्यक्षकारिणी च निश्चितमेव । ततः
परमपूज्यपादस्य रघुनृपस्य प्रपितामहस्याजस्य पितृ
रामभद्रस्य जनन्याः सीतायाश्च जीवनमधिकृत्य
यानिचित् महान्ति वृत्तानि श्रावयितुमर्हति भवती ।

राज्यलक्ष्मीः - पितृपुरुषेषु तवानुरागविशेषं विलोक्य परं हर्षमुपागतास्मि । यत् त्वया पूर्वपुरुषाणां महान्ति वृत्तानि श्रोतुम् इष्टानि, तान्यहं स्वशक्त्या तत् सम्बन्धिनो जनान् त्वत्समीपं समुपस्थाप्य साक्षादेव श्रावयिष्यामि।

द्वितीय दृश्यम्

स्थानम् - वशिष्ठाश्रमः

कालः - सन्ध्या

(प्रविशन्ति ध्यानावस्थो महर्षिर्वशिष्ठः सरस्वती - ध्यानरताः शिष्याश्च)

वशिष्ठः — वत्साः । अद्य जनन्या वाग्देव्याः स्तुतिं कुरुत ।

शिष्याः — यथाज्ञापयति भवान् भगवान् ।

नादब्रह्मविहारिणि स्वस्वरूपिणि ।

(1)

निगमागमप्रभे । तमोदलनि ।
मधुरमोहनवीणावादिनि ।
वाणि । स्फटिकमालाधारिणि ।
करुणामसृणकमलविलोचिनि ॥

(2)

कुन्दकर्पूरधवलहासिनि ।
सौम्ये । सारदे । शारदायिनि ।
श्वेतकमलामलदलविहारिणि ।
सितचन्दनचर्चितवरवर्णिनि ॥

(3)

स्मृतिपुराणादि - देहाष्टकधारिणि ।
प्रणतभक्तकुलकवित्वविधायिनि ।
सरस्वति । स्मृतिमेधाप्रदायिनि ।
कुमतिहारिणि सर्वशुक्ले जननि ।
भ्रमतिमिरसनकार तत्त्वविकाशिनि ।
भक्तजनभारति । भास्वति भवति ॥
देवि सरस्वत्यै नमो नमः ॥

(ततः प्रविशति दिलीपः)

दिलीपः - भगवन् प्रणमामि त्वाम् ।

वशिष्ठः - वत्स दिलीप । पन्नगाः सर्वे कुलायं प्रविष्टाः । श्रान्तः क्लान्तश्च जीवनिवहः जननी निशीथिनी - क्रोड़मालिंगितुं जातो व्यग्रमानसः । कामदुघायाः सुरभेर्नन्दिन्या दिवसव्यापिन्या सेवया त्वयापि सुतरां श्रान्तेन भवितव्यम् । तथापि उत्फुल्लो लक्ष्यसे किमत्र कारणम् ? ब्रूहि, ब्रूहि, विशेषेण ~~श्रोतुमिच्छामि~~ श्रोतुमिच्छामि ।

दिलीपः - पितः । भवच्चरणारविन्दे निवेदयामि सा गोचारणवेलायां संवर्धितम् आश्चर्यं वृत्तम् । हिमाचले गङ्गा प्रपातप्रदेशे यदा जननी नन्दिनी शष्पादनव्यग्रा बभूव तदा कांचन सिंहस्तां व्यापादयितुकाम ~~उच्चैस्तम~~ उच्चैर्घोषं कृत्वा समीपमाससाद । प्रसङ्गक्रमेण तेनोक्तम् शिवप्रसादनतत्परोऽसौ देवदेवस्य परमानुग्रहभाजनम् । तस्य ततस्तत् प्रसादाद् यत् इमां गावं प्राप्तवान् तत एव सा निश्चितं अर्थयते ।

महर्षिः - वत्स! ततस्ततः ?

राजा - मया उक्तम् - गुरोर्निदेशादहम् असौ मातृसमाया धेनुरक्षि गौरस्मि रक्षणा नैक्षणविधौ नियुक्तः । आप्राणत्यागं सेयं गोजननी मया रक्षणीया । ततो मदव्यापादनं विना नास्या व्यापादनं त्वया कर्तुं शक्यम् इति । मया एवमुक्तः सिंहस्तु सर्वथा आत्मसंरक्षणमेव वरमिति मामुपादिदेश । मया तु तदुपदेशं प्रत्याख्याय तद्भक्षणार्थम् आत्मानमेव तत्सम्मुखे निपात्य निमीलितनेत्रेण स्थितम्

स्थितम् । एवं ~~प्रतिक्षणं~~ प्रतिक्षणं आत्मोपरि सिंहनिपातम् उत्प्रेक्षमाणेन मया क्रियत् बाला-नन्तरम् "वत्से, उत्तिष्ठ" इत्यभूतायमानम् अङ्गर-पंक्तिं श्रुत्वाहं चक्षुरुन्मील्य जननीं नन्दिनीमेवा-पश्यम्, न तु सिंहम् ।

महर्षिः - मन्ये नन्दिन्येव सिंहरूपमास्थितं तव भक्तिं ~~परीक्षितवती~~ परीक्षितवती ।

राजा - आर्ये किम् ? ततः सा सुतरां भीता मां व्याहृत-वती - मनोऽभीष्टं ते नचिरादेव ~~पूर्णं~~ पूर्णं भविष्यतीति ।

सुतासंगात् परमसुखपरिपूर्णा वसुन्धरा जीर्णारण्यमिव पर्यदृश्यत । इदानीम् आशासे भवत्-प्रसादात् यथा राज्यस्य सर्वत्र वर्तते परमा शान्तिः लसति च भगवती लक्ष्मीः प्रतिगृहम्, तथा मम भवतः पुत्र्याः सुदक्षिणायाश्च नितरामेव भविष्यति आनन्दोद्वेल्लितं जगत् नचिरादेव पुत्रसम्पत्त्या । तदधुना भवदाशिष एव प्रार्थये ।

महर्षिः - राज्यलक्ष्मीस्वरूपिण्यां मे दुहिता सुदक्षिणा ~~कार्य~~ कार्यवशात् स्थानान्तरं गता । युवयोरचिरादेव पुत्ररत्नं जायताम् । पुत्ररूपस्नेहग्रन्थियुवयो-र्हृदयद्वयं सुतरामेव एकीकुर्यात् । परं क्षेमं ते भवतु ।

राजा - चिरञ्जीव्य देवर्षेदेव । भवदाशिषः पुष्पधारां निपत्य नु आवां ~~चिरक्षेमविघ्नावितौ~~ चिरक्षेमविघ्नावितौ कुर्वन्त ।

द्वितीयः अङ्कः

(प्रविशति रघुराजः)

रघुः - (स्वगतम्) अहोः कालात् प्रारब्धस्य दिग्विजयस्य समाप्तौ कृतायां मया विश्वजिद्याग्यस्य यागः । दक्षिणा-रूपेण दत्तं सर्वस्वमित्यहो आनन्दातिशयो मे । सचिवानां परामर्शक्रमेण विजितो वृषः स्वं स्वं

देशं प्रति प्रेषिताः स्वजनवियोगविधुरास्ते, सुख-मासुप्युः। (पुरतः अवलोक्य) कः कोऽत्र भोः। दक्षिणाक्षी कोऽपि द्वारि वर्तते चेत् स आनीयताम्।

प्रतिहारी - (प्रविश्य) यथाज्ञापयति महाराजः।
(ततः प्रविशति वरतन्तु शिष्यः)

कौत्सः - अहं वरतन्तु शिष्यः कौत्सः।

रघुः - भगवन्! अपि कुशलं ते? मत्प्रदत्तमर्घ्यं गृहाण।

कौत्सः - आयुष्मन्! शरदां शतं जीव। ~~तेऽस्तु~~

रघुः - आर्य! अपि कुशलम् ~~क्षत्रियस्य~~ ऋषिप्रोक्तस्य गुरुवर्यस्य ते?

कौत्सः - अथ किम्?

रघुः - अपि तस्य तपो वर्धते? अपि शान्तमाश्रमपदं - मधुना सर्वथा विघ्नरहितम्? अपि बहुयत्नैः सुतनिर्विशेषं संवर्धिताः आश्रमपादपाः सर्वे - पल्लवरहिताः? परमादरेण परिवर्धिता हरिण्यः सर्वाः सुखप्रसवाः वर्तन्ते? अपि भवतां नियमा - भिषेकसाधकानि पितृनिवापार्हाणि योग्यानि तीर्थसलिलानि सर्वथा

रघुः - शिवानि? अतिथिसंकाराय संरक्षितं भवतां शरीरस्थितिसाधनं नीवारश्यामाकादि जातमेतद् गोमहिषा-दिभिर्न आमृश्यते कदाचित्?

कौत्सः - राजन्! भुवः शासितरि त्वयि स्थिते कुतो विघ्नागमः? सूर्ये तपति कथमन्धकारो जगदाक्रमिष्यति? अपि गुरुवरः कुशली, आश्रम-पदस्थं सर्वथा शान्तिपूर्णं राजते।

राजा - महाभाग! अपि प्रसन्नेन महर्षिणा ~~दत्तं~~ दत्तविद्योगवान् गृहप्रत्यावर्तनाय अनुमतोऽसि? तवागमनेन परम् अनुगृहीतोऽस्मि। अपि त्वं गुरोराज्ञया स्वेच्छया वा मां सम्भावयितुं वनादत्र आगतोऽसि?

कौत्सः - (स्वगतम्) आतिथ्य सत्कारार्थ मृन्मय पात्रेण अर्घ्यं दधतो राज्ञो दैन्यदशा नितरामेव प्रकटीभूता। यद् वा

तद् वा भवतु, स्वाभिलषितम् अस्मै विज्ञापयामि। (प्रकाशम्) राजन् भूत्येषु भक्तिर्भवितां कुलोचिता, तथापि भवान् भवत्पूर्वजान् अतिशेते। किन्तु, अहम् अकाले अधिभावाद् भवत्समीपं समागतोऽस्मीति मे विलीयति हृदयम्।

नरनाथ! धन्यो भवान्, यस्त्वं सत्पात्रैकग्रः सर्वस्वं प्रदाय मुनिजनपरिगृहीत-शस्यः शुष्कस्तम्बावशिष्टो नीवार इव प्रतीयसे। सम्राड् अपि भवान् अधुना कपर्दिकहीनोऽस्ति राजन् स्वरत्यै सन्नते, अहम् अन्यतः स्वाभिलषितमर्थम् आहर्तुं प्रतिष्ये। (प्रस्थातुं प्रक्रमते)

राजा - महाभाग! यद्यप्यहम् इदानीं दीनतामोहास्मि तथापि भवता स्थानान्तरं न गन्तव्यम्। प्रथमं तावदुच्यतां भवतः किं कियद् वा वस्तु अभिलषितमिति।

कौत्सः - राजन्, शृणोतु भवान्। समाप्त-सर्वविद्येन मया गुरुः पृष्टः - कीदृशीं दक्षिणां दातव्येति। स तु महात्मा वरतन्तु प्रस्तव भक्तिरेव सर्वोत्तमा दक्षिणेत्याह। मया तु निर्बन्धेन दक्षिणान्तर दानाय निर्बन्धातिशयः प्रदर्शितः। ततो मन्निर्बन्धातिशयेन रुष्टो गुरुरुक्तवान् चतुर्दश विद्या मया त्वमध्यापितः, ततश्चतुर्दशकोटी/र्मुद्रा मे आनयेति। तत एवाहं मया भवान् प्रार्थ्यः। साम्प्रतं भवतः अवस्थान्तरं दृष्ट्वा तदर्थं त्वामनुरोद्धुं नोत्सहे।

राजा - श्रुतपारदृश्वन्! न त्वया अर्थाहरणाय स्थानान्तरं गन्तव्यम्। भवता द्वित्राण्यहानि मदीये अग्न्यगारे चतुर्थोऽग्निरिव स्थीयते चेत् त्वदभीष्टमर्थं स्थानान्तरात् आहर्तुं यतिष्ये।

कौत्सः - एवमस्तु, सफलो भवतु भवतोऽभिप्रायः।

राजा - (सचिन्तः) कुत इदानीम् अर्थ आहरणीयः? पृथिवी तु पूर्वमेव हृतसारा वर्तते।

भवतु, कुबेरं विज्ञप्तय ~~प्रार्थित~~ प्रार्थितान् अर्थान् आहरिष्ये।

(उभौ निष्क्रान्तौ)

(समयः प्रभातम्) ~~वृत्तोऽ~~ तृतीयः ?

(प्रविशति सशस्त्रः रथारूढो राजा)

राजा - अद्य मया कुबेरं जेतुं गन्तव्यम्। कः कोऽत्र भोः।

(ततः प्रविशति भाण्डागारिकः)

भाण्डागारिकः - जयतु जयतु महाराजः। भद्रं लोकस्य दिवसारम्भः। श्रूयतां यदाश्चर्यं या यामिन्याः ~~यामिन्याः~~ शेषयामे संघटितम् नभस्तो हिरण्मयी वृष्टिर्निपत्य तव सर्वं कोशगृहं परिपूरितं कृतवती। ~~मन्ये~~, मन्ये, अभियास्यतस्तव सन्तोषविधानार्थं कुबेरेणैवेदं कृतम् तदलं ते कुबेराभियानेन।

राजा - प्रियं मे प्रियम्, इदानीं निश्चिन्तोऽस्मि भाण्डागारिक! त्वरितमानय मुनिशिष्यम्।

भाण्डागारिक — बाढम्। (निष्क्रम्य कौत्सेन सह पुनः प्रविशति)

~~राजा~~ राजा -(कौत्सं प्रति) वेदविदां वर। एताः सर्वा मुद्रा गृह्यन्ताम्, भवत एव एता मुद्राः।

कौत्सः - राजन्, न मे अधुना प्रभूतेन हेमराशिना किमपि प्रयोजनम्। गुरुर्याचितश्चतुर्दश — कोटीरेवाहं याचिये।

राजा - विद्ववर। नहि नहि, भवत आगमनेन सर्वथा धन्योऽस्मि।

कौत्सः - सदृशवते रोचते। अहो महिमा भवतः, यद् ~~=~~ यो — ~~द्वौरपि~~ भवते कामदुघा जाता। भवता सर्वार्थि

श्रेयांसि समधिगतानि। केवलमिदानीं आत्म-तुल्यो वीरस्तनयस्ते जायतामिति गर्वमेहि।

राजा - भगवन्! अभिवादये।

(स्थानम् - इन्दुमत्याः स्वयंवरसभा)

ततः प्रविशतः सुनन्दा इन्दुमती च।

सुनन्दा - इत इतो भवति। राजनन्दिनि! सावधानं श्रूयताम् भवल्लाभाशया दिग्भ्यो दिगन्तरेभ्यः समुपागता बहवो राजानः। तेषां सर्वेषामेव चित्तं त्वयि गाढं समासक्तमिति दृश्यते। मिलनसूत्रं जन्म-जन्मान्तरानुबद्धं पुण्यवतास्ते, स्थान एव तत् चनिष्यति। (पुरतो गत्वा) अयं परशुपो नाम मगधराजः। एष शरण्यः अगाधसत्त्वः। स्वयमिन्द्रः अस्य यागेषु सर्वदा सन्निहितस्तिष्ठति। अनेन पाणिं परिगृह्यमाणमिच्छसि चेत् त्वं कुसुम-पुराङ्गनानां नेत्रोत्सवो भविष्यसि।

इन्दुमती — नमस्ते राजन्! मातृसखि गच्छाग्रतः।

सुनन्दा - नृपनन्दिनि! अयं पुरतस्ते अङ्गनाथः। परन्तपेऽस्मिन् राजनि स्वभावविशेषिण्यौ अपि श्रीः सरस्वती च नितराम् वर्तेते। अस्य पाणिग्रहणेन त्वं तयोस्तृतीया भविष्यसीति मन्ये।

इन्दुमती - मन्ये। गच्छाग्रतः।

सुनन्दा - नृपकन्ये! अयं अवन्तिनाथः सुप्रतीको नाम उज्जयिन्या अधिपतिः। अस्यैव प्रासादस्य नातिदूरे निवसति चन्द्रमौलिर्भगवान् महाकालः। अत एवायं कृष्णपक्षेऽपि प्रियाभिः सह ज्योत्स्नामयीर्यामिनीः सुखेनातिवाहयति।

इन्दुमती - मातृसखी, पुरतो गच्छ।

सुनन्दा - एषोऽनूपदेशाधीशः प्रतीपः महाभोगिनः कार्तवीर्यस्य वंशसम्भवोऽयम्। एवं यदि द्रष्टुमिच्छसि तर्ह्येतस्य अङ्गलक्ष्मीर्भव। (इ)

इन्दुमती - यादि अग्रतः।

सुनन्दा - राजकन्ये! मया विशेषेण वर्ण्यमानास्ते ते राजानः न ते मनस्तोषाय भवन्तीति दृश्यते; तदलं मे मृषा कण्ठशोषणेन, अतः केवलं नाम्नैव कंचन निर्दिश्यन्ते। अयं नगपुरपतिः तालीवनमर्मरम् आसागरतीरं विस्तीर्णम् अस्य राज्यम्। अयम् इन्दीवरश्यामतनुः पाण्ड्यदेशाधिपतिः। अनेन सार्धं तव मिलनेन सरिन्तोयदयोगो भविष्यति। अयञ्च कलिङ्गाधिपतिर्हेमाङ्गदो नाम। अयं महेन्द्राख्यं कुलपर्वतं महोदधिञ्च समं प्रशास्ति।

इन्दुमती - नम एतेभ्यः। अहो! कथं नु मे वामं चक्षुः स्पन्दते? अन्यत्र अग्रतो गच्छ।

सुनन्दा - वरवर्णिनि! कुक्षेरयं कुक्षेरयं सूर्यवंशप्रभवो महान् नृपोऽजो नाम। महाभहिमशालिनः सूर्यवंश्यावतंसभूतोऽयम्। कुलेन कान्त्या गुणैश्च उद्वाहमनस्तुल्यमिमं राजानं वृणीष्व वृणीष्व। मणिकाञ्चनयोर्मेलनं भवतु।

(समर्थ-समास?)

इन्दुमती - (स्वगतम्) अहो! गुणोऽधुना मे मनोरथः। कथमपि हृदयोच्छ्वासं प्रशमयितुं न शक्नोमि।

सुनन्दा - नृपपुत्रि! अन्यतो व्रजामः।

(इन्दुमती मातृसखीम् असूयाकुटिलं पश्यति)

चतुर्थोऽङ्कः

राजलक्ष्मीः - राजन्, श्रुतस्त्वया ह्येन्दुमत्या सहाजस्य परिणय-वृत्तान्तः। परिणयोऽयं सर्वथा सुखोदर्को + जातः इति न वक्तुं शक्यते। सेयमिन्दुमती शापभ्रष्टा सुराङ्गना आसीत्। ततः सा त्वत्प्रियतमं दशरथं ~~प्रसूय~~ प्रसूय ~~अ~~ अल्पीयसैव दिवसेन नारद-वीणाभ्रष्ट-पारिजातपुष्पमालास्पर्शेन निर्मुक्तशापा भूयः सुरलोकमध्यासादितवती। अजमहाराजश्च पत्नीवियोगाविधुरोऽपि पुत्रस्य वयःप्राप्तिपर्यन्तया कियत्कालं राज्यं पालयन् दशरथाय राज्यं दत्त्वा वानप्रस्थमवलम्बितवान्।

पितामहस्य ते दशरथस्यापि जीवनं न कुसुमास्तीर्णमित्यपि त्वया विदितप्रायमेव।

कुशः - देवि! महत्कारुण्यं मे प्रदर्शितं भवत्या। अथेदानीं पितृदेव-रावण सङ्गरं पाताल प्रवेशौन्मुख्यीं ~~जननीं~~ जननीञ्च द्रष्टुमिच्छामि।

राजलक्ष्मीः - राजन् तथास्तु।

(जनन्या आद्यशक्तेरकालबोधनम्, रामकृते रावणसंहारश्च)

(शरत्कालः। प्रविशतो रामलक्ष्मणौ)

रामः - वत्स लक्ष्मण! यद्यपि जानकीविरहविधुरो म्रियमाण इवास्मि तथापि अद्य हृदयं हर्ष-पुलकमिवानुभवामि। परमजनन्या आशीर्वादैः स्नातमिव चात्मानं मन्ये।

लक्ष्मणः - आर्य! ममापि तादृशो भावावेशो जातः। पश्य पश्य - जननी शरल्लक्ष्मीश्चतुर्दिशु जगज्जननीकायं परिगृह्य स्वयमेव अस्मभ्यं

आशीर्दानाय समागता। पत्रे पुष्पे नगेनीले
जलाशयादिषु च आनन्दस्वररूपिण्या आगमना -
न्देवार्चयाः स्वतः स्फूर्तिः संलक्ष्यते, हे देव।

शारदश्रीः सुशोभिनी तनूमनोविमोहिनी समागता मोहन-
समागता मोहन प्रभाते।

नीलोत्पलोशतदल - प्रफुल्ल - हिल्लोलदल
प्रमोदित - कल्लोलिनीवाते ॥ १॥

गहन - काशकानन - विगृहीकुलकूजन -
पुलकित - मर्मरमुस्वने ॥

गीयत आगमनी चित्तप्रसादिनी
बहिरन्तर्हृदे वाटे-वने ॥ २॥

मन्दं मन्दं वहति पवनः प्रेममाधुर्यसिन्धुः
सोऽयं स्पर्शः सुवहितकरः स्नेहरक्तो जनन्याः।
प्रेमाकारं प्रचलति पयः शैवलिन्याः प्रसन्नं
नीवाराग्राद् गलति जिगतं मङ्गलाशीस्तवोयान् ॥ ३॥

सर्वरूपस्वरूपा त्वं सर्वरसस्वरूपिणी।
सर्ववर्णसमाहार - सर्वलीला विधायिनी ॥ ४॥

ईदृशीं परमकल्याणमयीं जननीं वाचेन मनसा
वाचा नमस्करोमि।

शम० - प्रातर्लक्ष्मण। त्वया सम्यगनुश्रुतम्। अहमपि
शारदां शरल्लक्ष्मीस्वरूपामभिवन्दे।
शारदे शारदागते रूपस्य तुलनं नते।
प्रतिवस्तु रूपं लोचनोचरम्।
विश्वजननि। गायते विश्वेषु स्वरूपं ते
वर्णयामि कथमवर्णनीयम् ॥ १॥
सर्वत्र त्वं हि जननि। का पुनस्तवागमनी
शुभोत्सव - शुभोत्सव - विश्वरमे।

पर्वतशिखरे ~~सर्वे~~ रम्ये सागर-वितते सौम्ये
~~सदा~~ एकैव त्वं हरमनोरमे ॥2॥

सदागते सदास्थिते विश्वमातः सदाहिते
शुभागम पुण्यगाथा रमे ।
पर्वतसुते ललिते वयं वा मया गीयते
विश्वमातर्विश्वमनोरमे ॥3॥

(ततः प्रविशति हनुमान्)

रामः - अहो सुप्रभातमद्य, यद् वत्सं हनूमन्तमपि सभागतं पश्ये।

हनूमान् - देवौ! हनूमतः साष्टाङ्गं प्रणतिं गृहीतम्। भवन्तौ अद्य प्रफुल्लचेतसौ आलोक्य यद्यपि मे मनः उल्लसितमिवास्ते, तथापि न मे चेतसः प्रसन्नता जायते। ~~लङ्कापुरे~~ लङ्कापुरे साम्प्रतं मया श्रुतं यत् सा किल लङ्कापुरी स्वयं ~~पतिव्रता~~ हरेर्णासुरक्षितेत्यति। तस्याः वैदग्ध्ये न कस्यापि शक्तिर्वर्तते। तस्माद् हृदि मे परमो विषादः समायातः।

लक्ष्मणः - अहो दारुणा वार्ता। तथापि वत्स! मा विषीद। विपत्काले धैर्यमेव स्वाभाविकी एव। तथापि विपद्विनाशनार्थं गत्वोपायोऽप्यवश्यम् करणीयः।
~~हे~~ (राममुद्दिश्य) हे देव! मया गुरोः सकाशाच्छ्रुतं यत् प्रजापतिर्ब्रह्मा स्मर्यते चेत् कृपालुर्देवो विपद्विद्रावणोपायं सर्वदैव प्रदर्शयतीति। ततः असावेव अस्माकं शरणं भवतु। वयं तं परमं दैवतं ध्यानयोगेन वशीकुर्मः।

रामः - तथा भवतु (सर्वे ध्यानमातिष्ठन्तस्तिष्ठन्ति)

(ततः प्रविशति ब्रह्मा)

(1) ब्रह्मा - भक्तप्रवराः! यूयं यदर्थं मां ~~स्मरथ~~ स्मरथस्तन्मया सम्यक् श्रुतम्। किन्तु विना रुद्राणीं नान्यः कोऽपि हरस्य शक्तिं निरोद्धुं शक्नोति। एषा सैव

जगज्जननी सृष्टि-स्थिति-संहारहेतुः परमकरुणामयी भक्तानुग्रहविग्रहा।

ब्रह्मा - श्रीश्रीदुर्गैव इदं वशीकर्तुं क्षमते। ततो भवत्पुत्रा यूयं जननीं जगदम्बिकां प्रसादयितुं यतध्वे।

रामः - देव! विपत्सागरमग्नेन मया साम्प्रतं मनः स्थिरीकर्तुमशक्यम्। ततो यथा सा प्रसीदति तदुपायो भवत्भ्यः कृपया करणीयः।

ब्रह्मा - तथास्तु। एषोऽहं तां स्तौमि—

(ब्रह्मणो देवस्तुतिः)

? जननीं परकल्याणीं परात्परे प्रसादिके।
? कालः कालालयं याति त्वय्येव कालिकेऽम्बिके॥
महाधूम्रा महागौरी महामेधा महाधृतिः।
महाशक्तिर्महाकान्तिर्महाश्रुतिर्महास्मृतिः॥
त्वमेव प्रेमसर्वस्वं जगद्धारणकारिणी।
माता पिता स्वसा भ्राता सर्वमङ्गलसाधिनी॥
स्फुलिङ्गिनी महादीप्तिस्त्वमेव जगदम्बिके।
शरणं भव रामस्य भक्तचित्तप्रसादिके॥
धनुर्यज्ञसि रुद्राय त्वमेव रुद्रपालिनी।
समुद्धाराय सीताया रौद्रीं शक्तिं प्रयोजय॥

(आकाशे हविं वह्वा) किं ब्रवीषि? "तथास्तु" इति। हुम्। (रामं प्रति) तात, रामभद्र। सफलस्ते मनोरथोऽचिरादेव भविष्यति।

(सर्वे निष्क्रान्ताः)

षष्ठोऽङ्कः

(ततः प्रविशति इन्द्रजिता सह रावणः)

रावणः - कठोरा खलु नियतिर्या सिंहवीर्यमपि मां साम्प्रतं शृगालवधेऽपि अपराधं करोति। मानवः खलु सीतापती रामचन्द्रः, अहं महापराक्रमशाली राक्षसेन्द्रो रावणः। तथापि हृदयं मे चिन्ताविक्लवम्। वत्सेन्द्रजित् मताः खलु राक्षसश्रेष्ठा वीरप्रवरा कुम्भकर्णादयः तथापि सति त्वयि वासवविजयिनि मयि च राक्षसराजे कथं वा स्वर्णपुरी लङ्का विपर्यस्ता भवेत्- "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।" अहो। केन नु मधुरं गीयते?

जन्मभूमि - ~~भारतजननि~~ भारतजननि।
गङ्गा-गोदावरी-नर्मदा-कावेरी पुण्यधाराधौतभूमिनी।
दशभुज-विलासिनी दशदिशोल्लासिनी देववन्द्य-
भारतजननी॥१॥

वयं सुधन्या स्तव सन्ताना विश्वकलुषनाशिनि।
सागर-सुरणैं-मञ्जीरचरणे हिमगिरिवर किरीटिनि
विन्ध्यमेखलेजननि॥
वन्दामहे त्वां विश्वैकस्तुतां जन्मभू-भारतजननि।
सुस्मित हास्ये विलसित लास्ये त्रिभुवन त्राण
विधायिनि॥

अहो! ईदृश्या भारतजनन्याः कन्याभूतेयं लङ्कापुरी- अस्मज्जनकजननी जननी स्विद्
रिपुरिस्तादवश्यं रक्षितव्या।
मनुजेषु गरिष्ठोऽसौ देशाहितव्रते रतः।
नाशमणो नराकारे देशभूपदसेवकः॥
शाश्वतामरजीवनलाभार्थं क्षणभंगुराः प्राणा नूनं
देशसेवया विसर्जनीयाः।

प्राणाधिक तनयवर। युद्धसज्जा सुसज्जिता सुसज्जिता भव। त्वमद्य मया प्रधानसेनापतये वृतोऽसि। युद्धजयेन स्वपदोचितं गौरवमवाप्नुहि।

इन्द्रजित् - पितः। सर्वथा ~~स~~ समर्थोऽस्मि जन्मभूमिगौरव-रक्षणे।

त्रिलोकविजयी तातो महेन्द्रविजयी सुतः।
आत्मा वै जायते पुत्रो अद्यार्यं शास्त्रभाषितम्॥

भवता सर्वथा निश्चन्तेन भवितव्यम् भवितव्यम्। पित्रादेशात् सर्वं साध्वेव सम्पत्स्यते।

रावणः - मेघनाद! महेशप्रसादात् समरविजयी भव। कायेन मनसा वाचा त्वत् कल्याणं प्रार्थये।

इन्द्रजित् - श्रूयते समवारावः, यामि त्वरितम्।

(उभौ परिक्रामतः)

(ततः प्रविशतः राक्षसौ भल्लुक उल्लकश्च)

उल्लकः - भल्लुक! कोऽयं हनुमान् नाम? वानरो भूत्वाऽपि स संस्कृतगिरा अनर्गलं भाषते। श्रूयते - इन्द्रजिता सह आर्योच्चमे मूर्च्छामवाप्ते रामानुजे ~~लक्ष्मणे~~ लक्ष्मणे एव बद्धलाङ्गूलो हनूमान् एव प्रकाण्डं गन्धमादन-पर्वतमानीय मृतं लक्ष्मणं भूयः सञ्जीवितमकरोत्। नूनम् अनेन महता साधकेन भक्तप्रवरेण भवितव्यम्। योगबलेन हि भक्तप्रवरा असाध्यं असाध्यमपि साधयन्ति।

भल्लुकः - उल्लक! राक्षसो रावणोऽपि अबाधम् अनर्गलं संस्कृतं भाषते तत्राश्चर्यं किम्? साधकश्चेत् अवश्यमेव संस्कृतविद्या पारंगमो भवेत्। किन्त्वत्र अन्य-

देवाश्चर्यं यत्, बृहल्लाङ्गूलोऽयम् अशोक-कानन-वासिन्याः सीतायाः पुरतो गत्वा ऽधोमुखः ~~सर्वदा~~ सर्वदा तिष्ठति सगद्गदं भाषते च, न कदापि तस्या वदनावलोकनं करोति।

उल्लकः — तद् यथा तथा वा भवतु, किमनेनास्माकम्। किन्त्वयं स्वर्णलङ्कापुरी नचिरेण भस्मीभूता भविष्यतीति मन्ये। किंवा वयं कुर्मः। अहो दारुणा खलु परसेवा। इतः पलायनमपि सुदूरपराहतं मन्ये। यतः अद्यस्तनाः सर्वाः प्रजाः सुस्थ-सुस्थाश्चैवावश्यमेव युद्धे प्रेषणीया इति राज्ञा रावणेन समुद्घोषितम्। तथाप्यात्मरक्षायां प्रयत्नः करणीयः। राजपुरुषसकाशं गत्वा वस्तुविशेषेण तं परितोष्य युद्धाय बृहल्लाङ्गूलं प्रदर्शयिष्यामि। मया सह त्वमपि चल।

(प्रविशति राजपुरुषः)

राजपुरुषः — श्रुतं मया युवयोर्मुखभाषितम्। आगच्छतम्, प्रदर्शयामि वयम् उत्कोचः प्रदातव्य इति। अधुनैव युवां राजद्वारं नेष्यामि, येन ~~युवयोर्नामनी~~ युवयोर्नामनी आहवप्रेक्षमाणजनसूच्यां लिखिते भवेताम्।

उल्लकः — न मया किमप्युक्तम् अभिलषितं वा। अनेन ~~च~~ मल्लकेन अहं प्रलोभित आनम्। ~~अ~~ उद्धरतु मां भवान्, साष्टाङ्गं ~~प~~ पादयोः पतामि।

मल्लकः — सर्वमेतत् असङ्गतम् एतस्य। तथापि ~~प्रार्थये~~ (उत्कोचं मुद्रां प्रदर्श्य) यथा विपद्वारणीयं भवेयं तथा विधेहि। मारयतु वा कुद्धयतु वा नाहं कथमपि युद्धक्षेत्रं गमिष्यामि। युद्धनाम-~~श्रव~~ श्रवणमात्रेण मे प्राणपक्षिणो ~~उड~~

चड़फड़यन्तः शरीर ~~[illegible]~~ पञ्जरात् बहिर्गन्तु-कामा जायन्ते। ~~अस्मन्नामानि~~ अस्मन्नामकानि अन्य सूच्यां सन्निवेशिते तत्क्षणादेव हस्तिपकः क्रियाहीनं भविष्यति। मम सर्वस्वं गृह्णन्त गृह्णातु भवान्, मां रक्षतु।

राजपुरुषः - केयम् असत्कल्पना। यदि वयं राजपुरुषा अपि कलुषितवृत्तयो भवेम, तदा देशोऽचिरा- विधात्? देवादयः पतितो भविष्यति। हरे कृष्ण। विवृत-पुरुषोऽपि सुतरां रुष्टो भविष्यति। ततो गच्छ पुनरेतादृशं भण। (नाट्येन उत्कोचग्रहणेच्छां प्रकाशयति)।

(उल्लको मल्लकम् उत्कोच्य प्रधानाय इंगितेन प्रेरयति)

उल्लकः - भवानेव विधातृपुरुषः।
त्वयि तुष्टे जगत्तुष्टं रुष्टे रुष्टं जगत् त्वयि।
राजते परमो शेषः सर्वेषां तोषणं महत्॥
तुष्यतु तुष्यतु भवान्।

राजपुरुषः - श्वशुर पुत्रस्य भार्याभ्रातः! किं ब्रवीषि, अपि कदापि न पादुका दृष्टा? एवमेव पिष्टो भविष्यसि (पादुकाग्रहारसंकेतं करोति)।

उल्लकः - पिष्टपेषणसामर्थ्यं मल्लकोल्लक शासने।
तौ शेषं यदि गच्छेतां चूलीनां का गतिर्भवेत्॥

मल्लकः - (सुवर्णमुद्रां प्रदाय ~~[illegible]~~ अन्याश्च मुद्रा दर्शयित्वा) महापुरुष! महाराज पत्नी-सहोदर! विरम विरम वाक्यबाण वर्षणात्। आवयोः सुखपलायनं प्रतिभूणोषि चेत्, अद्यना प्रयच्छं जठरं चर्वि-चूष्य-लेह्य-चोष्यात्मना- दनेन शीतलं कर्तुं प्रगेसरो ~~[illegible]~~ व भव।

राजपुरुषः - तूष्णीं भव। शनैः शनैः गाङ्गलिके पथि चल। हरे कृष्ण। हरे कृष्ण।

मल्लकोल्लकौ - हरे राम। हरे राम। अतुलनीया खलु मुद्रौषधिः।

(सर्वे नृत्यन्तो बहिर्गच्छन्ति)

(अष्टम)

दृश्यम्

(ततः प्रविशति रावणः)

रावणः - हा हा मन्दभाग्ये प्रमीले। यद्यपि दारुणः पुत्रशोको मां अन्तर्गूढानलं शमीतरुमिव अहर्निशं दहति, तथापि मदुःखतस्तव दुःखं शतगुणमित्यत्र नास्ति संशयलेशोऽपि। साध्वी पत्नी भर्तर्येव जीवति। उभयोः खसितप्रश्वसिते समे। ईदृशे पत्यौ चिराय स्वसाध्वोचिते व्योम्नि गते कथं त्वमपि जीवसि? अयि हतभाग्ये ~~इन्द्रजिन्न~~ ~~इन्द्रजिज्जनानि~~ इन्द्रजिज्जननि। मन्योदरि। कथं तवापि शोकप्रशमनं भविष्यति? पुत्रस्तव जनन्या जीवनतटिन्या मूलप्रवाहः, यस्मिन् विद्युते मातुर्जीवननदी स्वत एव शुष्यति।

अथवा, नायं कालो विलापस्य। सर्वेषु प्राणप्रियेषु गतेषु मम वा जीवितैः प्रयोजनम्? रावणस्य समः कोऽपि विधताम् इत्यसहनीयमर्मा सोऽयं कपटाचारो ~~समः~~ रामो जानकीमपदेशेन मां दहतितराम्।

एक एवावयोर्जीवेद् रामो वा रावणोऽपि वा।
यशःशरीरमेवाग्निर्मूलं जीवनं भवेत्॥

कः कोऽत्र भोः।

(प्रविश्य) द्वारिकः — आज्ञापयतु महाराजः ।

रावणः — मद्वचनाद् ब्रूहि सेनापतिम् - सर्वस्वं पणं कृत्वा ऽतस्माभिरस्य योद्धव्यम् । रणाङ्गणे प्राणाहुतिर्मोक्षाय भवतीति विज्ञाप्य न केनापि कथमपि पृष्ठ प्रदर्शनं करणीयम् । भगवतो ऽस्य कृपया ऽस्माभिर्लङ्कापुरी रक्षितव्या खलु ।

भगवन् शम्भो । जन्मजन्मान्तरेष्वपि त्वामेव शरणं कृत्वा जगतः शरण्योऽभयम् ।

न मया कदाचन अप्रीतिकरं ते किमपि कृतम् । यच्च जानकी उपहृतेति, तत्रापि जन्मशत्रु - विजयेच्छा भगिनी शूर्पणखापमान प्रतिविधित्सा च अपराद्धतः, च नाहम् । तत् प्रसीद देवाधिदेव । यथा पूर्वेषु संग्रामेषु तथा अद्यापि मम विजयं देहि ।

(प्रस्थितः)

(ततः प्रविशति रामः)

रामः - मातर्दुर्गे दुर्गतिनाशिनि ।
देवीं सुवर्णरुचिरां महिषासुरघ्नीं
पृथ्वीतले धृततनुं सुरवृन्दभासा ।
घोरासुरादि हननाय सुसज्जितां त्वां
देवार्चितां शिवहितामसलां प्रणौमि ॥

जननि परात्परे । प्रसीद । अद्य शारदीयायां नवम्यां ~~घोरस्मिं~~ घोरसंग्रामे प्रवृत्ते रामभद्रे सन्तानो-चिते कृपां कुरु । सेयं राजनन्दिनी जनक-दुहिता साध्वी कुलशिरोमणिः सुवर्णप्रतिमा अत्याचारर्जरिता कृष्णचतुर्दशीशशिकलेव अशोककानने क्षीणजीविता राम ~~स कामयते~~ रामेति मां स्मारं स्मारं कथमपि कालम् अतिवाहयति । त्वदंशभूता सेयं जानकी,

तस्या अमूल्यं जीवनं रक्ष। देवि! आत्मनः
स्मृतिं धर्मं च रक्ष रक्ष। तथा विधेहि यथा
नव एव मे विजयोत्सवः ~~सम्पश्य~~ सम्पश्यते।

---

१० म दृश्यम

(रामरावणयोर्दिव्य संगरः)

ओं दुरात्मन् नराधम। ~~दुष्ट~~ दुर्द्रान एरण्ड-
पादपान उत्पाट्य ~~वीरोऽहमीत्युत्सह~~ वीरोऽस्मीत्यु-
से? त्सहसे? न जानामि महामहीरुहस्य पाताल-
निमग्न-मूलस्य शक्तिम्। जननी जन्मभूमिः
स्वर्णलङ्कापुरी त्वया विध्वस्ता, आत्मीयाः
कुटुम्बाश्च मे बहवो मारिताः प्रजाश्चोपद्रुताः।
शृणु रे फेरव! आबाल्यान्मत्तस्य दाम्भिकस्य
ते प्राणग्रन्थिम्, अद्यैव छिनद्मि। वीरोऽस्मीति
प्रगल्भसे अद्य च नारीं ताडकां हतौ खर-
दूषणावपि हन्तुं न लज्जसे, किमयं वीरधर्मः?

रामभद्रः — अन्तर्गूढ पापमनन्ते मज्जन्ते मरणेऽपि समुचितमेव
ओ रावण! नियतिः केन लङ्घ्यते? न मे
एरण्डस्य महामहीरुहस्य वोत्पाटने काप्यासक्ति-
रस्ति। किन्तु धर्मो मयाऽवश्यं रक्षणीयः।
अधर्मस्योन्मूलनमेव मे जीवनव्रतम्। सत्यमेतत्
यत् ताडका नारी, किन्तु क्रिया तस्या
सुनिज्ञानां प्राणहानिकरी आसीत्।
शिष्टानामनिष्टमपानं ~~क~~ वा नाहं सोढुं
शक्नोमि, सति तपोविघ्ने तन्निरसनमपि
राजधर्मः। स चेन्नारी निग्रहार्हते

पालयितुमशक्यश्चेत् स निग्रहः सुतरामेव करणीयः।

शारङ्गा- धर्मफलस्य पाकायैव खरदूषणयोरुपासीत् तादृशी जीवनावसानेन परिणतिः। मानापमानौ मे समानौ। अहं केवलं ब्रवीमि आदिकल्याणं, मध्यकल्याणम् अन्त्यकल्याणञ्च धर्मं केवलमाचर। स चेत् परित्यज्यते पन्थाः, यातमारपरिहार्यैव।

रावणः- अहो धर्मवीर। सुष्ठु धर्मिकथां भाषसे। दुर्भाग्यमिदं धर्मिकथायाः यद् अद्यश्विका एव सुतरां धर्ममुपदिशन्ति। सोऽयं धर्मः मदभिन्नायाः शूर्पणखाया नासिकावर्तनवेलायां त्वद्भ्रात्रा लक्ष्मणेन परिपालितः?

राम०- मूढोऽसीति भूत्वा एतादृशं भाषसे। कपटाचारा धर्मच्छद्मना लोकान् वञ्चयन्ति चेन्न स धर्मस्य दोषः।

नारीमां बहुमानः सर्वथा विदित एवास्माकम्, किन्तु तया सर्वथा कामित एव नार्या भवितव्यम्। नारी मातृजातिः। आजन्माभिदं वर्षं सर्वथा मातृपदबलम्। अतो जनन्येव परमा गतिः षडैश्वर्यमयी।

रावणः- सर्वमेतत् उलीकभाषितं ते। वर्षमिदं न मातृपदबलम्। अत्र तातः शिव एव सर्वभूतनाथः, सर्वाधीश्वरेश्वरः। तस्यैव बलादहं बलीयान्। न कोऽपि मां पराजितुं शक्ष्यति।

राम०- राक्षसापसद। अहं त्वामवश्यं हनिष्यामि। किन्त्वहं निमित्तमात्रम्। सा सर्वेश्वरेश्वरी

हरस्यापि शक्तिदात्री जगज्जननी पतितपावनी दुर्गा दुर्गतिनाशिन्येव ते मरणं विधास्यति ।

सीतामर्षणेन खेव जगज्जननी अवमानिता वर्तते । भारतमिदं न कदापि नारीधर्षणं सहते । ततो देवीपदारविन्दे समर्पयात्मानम् । शुभमस्तु ते वर्तमानम् , भविष्यच्च भवतु कल्याणावहम् ।

रावणः - (स्वगतम्) कोऽयं रामभद्रः ? अथवा अलम् अन्यथा चिन्तया । यो वा को वा स भवतु , तेनैव मे लङ्कापुरी विध्वस्तेति तम् अवश्यमेव हनिष्यामि । हृदय ! दृढं भव, कथं भाम् अथवा अवसादयामि ? (प्रकाशम्) रे रे दुरात्मन् ! युध्यस्व, भगवतो हरस्य मे प्रभावात् तव दुर्गतिनाशिनी दुर्गा नचिरादेव पलायिष्यते ।

रामः - अयमहं सन्नद्ध एवास्मि ।

(युद्धवाद्यम् , रावणस्य निष्क्रान्तः]

कुशः - देवि सदृष्टिं राज्यलक्ष्मीम् । लब्धं भवत्-प्रसादात् मया परमं ज्ञानम् । इदानीं मातुर्मे पातालप्रवेशादशायां वर्तमानायाः पित्रा रामभद्रेण सह संलापहरणं द्रष्टुमिच्छामि । तत्र भवत्या कृपावत्या भवितव्यम् ।

राज्यलक्ष्मीः - बाढम् ।

---

११ श दृश्यम्

(प्रविश्य आसनस्थौ सीतारामौ)

सीता - आर्यपुत्र! अन्योऽयं राजवंशो यस्य प्रतिष्ठितो वशिष्ठशिष्यः स्वयं काकुत्स्थः। यस्य मित्रं स्वयमिन्द्रः। अस्यैव वंशस्य नृपतिभिरुदारचरितैर्- वसुमती राजन्वतीति कथ्यते। अहो मे सौभाग्यम् यदेतादृशस्य राजवंशस्य अहं कुलवधूरस्मि।

रामः - प्रिये! न केवलं कुलवधूः, स्वयमप्यसि काचन राज्ञी।

सीता - अत एव मया तथा यतितव्यं यथा स्वमतीतानां राजमहिषीणां पदाङ्कमनुसर्तुं शक्नोमि। किञ्च, आवयो राज्यं यथा सर्वकालीन सर्व-देशीय राज्यानामादर्शभूतं भवेत् तदर्थमावाभ्यां मिलितव्यम्।

रामः - देवि! प्रजानुरञ्जनमेव राज्ञाम् अद्वितीयं कर्तव्यमिति जानामि। अतएव तदेवास्माकम् अनन्यसाधारणं कार्यमस्तु।

सीता - अत्र कः सन्देहः? कठोरात् कठोरतरो हि राजकार्यभारः। तस्यैतस्य दुर्वहत्वं स एव जानाति य इमं वहति। मम तु त्वत्-परिचार्यैव एकमात्रं कार्यम्। मम तु दृढशक्त्या सर्वथाहं तव चरणारविन्दं सेविष्ये।

रामः - देवि! शक्तिः शक्तिरेव, नास्ति तत्र गुरुलाघवचिन्ता। अहन्तु मन्ये, त्वय्येवाहं शक्तिमान्। आवयोरभिलाषः पूर्णो भवतु।

सीता - देव ! अद्य मया संस्मर्यते ~~किम~~ किलावयोः पञ्चवटीवने सुखसंस्थानम् । चिरसहवासात् तत्रत्या ः पुष्पित-लताद्रुमाद्याः मधुर-हरिणा-दयश्च मे नितरां ~~स्नेहभाव स्नेहभाग~~ स्नेहभाज आसन् । किञ्च तत्रानुभूतं दुःखमपि स्मर्यमाणमिदानीं सुखतया मे प्रतीयते । अतएव पुनरपीच्छा जायते ~~तेषा~~ तेषामालोकने । अपि नाम तत्र पुनर्गमनं मे भवेत् ।

राम ः - देवि सीते ! अयं चाराऽऽगमनकालः, ततोऽहं बहिर्गच्छामि । (बहिर्गच्छति रामः)

सीता - कथम् आर्यपुत्रस्य पुनरागमने जायते विलम्बः ? अपि ~~किम्प्र~~ किमप्यशुभं संवृत्तम् ? नवनीत-कोमलं खलु दुर्दिल-~~श्यामलतोर~~ श्यामतनोरार्यपुत्रस्य हृदयम् । अपि प्रजासु किमप्यशुभं संवृत्तम् ?

(पुनः प्रविशति रामः)

आर्यपुत्र ! कथं ते वदनं निमेषाच्चन्द्रकरसंपृक्तं कमलमिव संवृत्तम् ? हृदयं मे वेपते नितराम् ।

रामः - देवि ! न कातराभव । पञ्चवटी पुनर्दर्शन-समुत्सुकायास्ते मनोरथमचिरादेव पूरयिष्ये । (स्वगतम्) अहो कष्टम् ! ~~चिर~~ चिरदुःखिनी रामगतजीवना सीता पुनरप्यनाथा विपत्स्यते । प्रजा भूयोऽपि वह्निविशुद्धायाः सीतायाः रावणगृह-वासमधिकृत्य अपवादमुखरा भवन्ति चेत् किं वा

हतभाग्येन च रामेण करणीयम् ? ईदृक् इक्ष्वाकुवंशीयानां भूपतीनां प्रजानुरञ्जनमेव प्राणेभ्योऽपि गरीयः। तादृदानीं सीतापरित्यागादृते नान्या मे गतिर्विद्यते।

(सीतामुद्दिश्य) देवि! साम्प्रतं क्लान्तेव परिलक्ष्यसे तत्क्षणं निद्रासुखं लभस्व।

(उभौ निष्क्रान्तौ)

कुशः - देवि! अयोध्याराजलक्ष्मीः। श्रुतं मया यत् पितृव्येन सौमित्रिणा सह ममाजन्मदुःखिनी जननी काननं प्रेषिता। ततो महर्षिर्वाल्मीकिर्मम जननीं दुहितृरूपेण परिपालयामास।

संस्मरामि तावदावयोः पितृश्वमेधाश्वग्रहणजन्यं पितृव्यादिभिः सार्धं क्वोरं युद्धम्।

ह ? तदनन्तरहत पितुरश्वमेधयज्ञस्थानं भगवता वाल्मीकिना नीयमानावावां रामायणगानेन सभासदो नितरां विस्मय विमूढान् कृतवन्ताविति। देवि! तदनन्तरं किं वृत्तमिति न सम्यक् स्मरामि। अतस्त्वं कृपया तत्तद्वृत्तान्तं चक्षुर्भ्यां द्रष्टुमिच्छामि।

राज्यलक्ष्मीः - एवमस्तु। तदनन्तरं पिता ते वाल्मीकिसकाशं गतवान्। पश्चेदानीं तत्रत्यं वृत्तम्।

(प्रविशतो वाल्मीकिः रामभद्रश्च)

रामभद्रः - भगवन्! अनुगृह्णातु माम् आर्यः प्रणति व्रतेन। भगवन्! कौ तौ भवच्छिष्यौ, यौ तदानीमश्वमेधावसरे स्वरेण गीतिगौरवेण च गाम्

ं ? अति उदञ्चित-केशयं कदम्ब कुसुमिनाकुरुताम्। यद्यपि तत्त्वतो न जानामि। तथापि मनो मे ब्रूयति - तावस्मत् सुताविति।

वाल्मीकिः - वत्स राम! सत्यं तौ कुशलव संज्ञितौ भवच्छिष्यौ तवैव तनयाविति। मद्दृष्टितं समग्रं रामायणारब्धं महाकाव्यं तौ तदानीं समासादं

गीतवन्तौ । दुहितुर्मे सीतायास्तावेवैकमात्रं जीवितावलम्बनम् । स्वभावशुद्धायाः सीतायाः निर्वसनेन जगदेव समग्रं निमग्नदिवं जातम्, दीप्तं महत्तमोवृतमास्ते । वत्स रामभद्र ! इच्छसि चेद् वंशस्य कल्याणम् आत्मनो हितं शुभञ्च समग्रस्य राष्ट्रस्य तेषम् इक्ष्वाकुकुलतन्तुसन्ततेरेव - अश्वमेध-मख समाप्तावेव सर्वेषां मदग्रे समग्रं प्रतिगृह्यताम् । साऽधुना मद्गेहे वर्तते । मद्वचनात् सा ध्रुवमत्रागमिष्यति ।

रामः - भगवन् ! भवता यद्यद्युक्तं यद्यदुक्तं न तत्र मे कोऽपि सन्देहः । स्वयमग्निरेव पूर्वं सीताया निष्कलुषत्वमुद्घोषयामास, किन्तु पौरा जानपदाश्च तथापि न सीताविषये सन्देहं जहति । रघुवंशीयैः प्रचारस्तनमवश्यमेव विधेयम् । एवं सति सीता तथा किञ्चन् विदधातु यथा प्रजावर्गस्य सन्देहलेशोऽपि न विद्यते ।

वाल्मीकिः - (स्वगतम्) - अहो नु दुर्भाग्यम् । किं सा भूयोऽपवमनानां सोढुं शक्ष्यति ? अहो चित्रम् ! यः खलु सौवर्णीं सीताप्रतिकृतिं सहधर्मिणीत्वेन परिकल्पयेत् तेन इष्टवान् तस्यैव अयम् उपदेश आदेशो वा । (रामं प्रति) वत्स राम ! यदा प्रभृति सेयं जनकनन्दिनी तुभ्यं समर्पिता तदाप्रभृत्येव तस्यां तव सर्वतोमुखी प्रभुता स्वीकृतास्ति । नास्माभिस्तत्र किमपि वक्तव्यं स्यात् । यस्याः खलु जन्मना जनककुलं परिग्रहेण च त्वदीयं कुलं धन्यतमं जातम्, तस्या एव भूयोभूयश्चरित्रपरीक्षणं विधातृ विहितं चेत् तदेव भविष्यति । सा मया निश्चितम् अज्ञानेतला ।

१३ श दृश्यम्

(अयोध्या - राजसभा)

(~~प्रविशति~~ प्रविशन्ति रामः, सभासदः, वाल्मीकिः सीता च)

वाल्मीकिः - (राममुद्दिश्य) राघव ! किमहं त्वदादेशं मद्दुहितरं सीतां श्रावयिष्यामि ?

रामः - महर्षे ! एवमस्तु |

वाल्मीकिः - शृण्वन्तु भवन्तः, अयं राजा यादिशति यदियं तत्सहधर्मिणी सीता भूयोऽपि परीक्षणे समुत्तीर्णा भवेत्, तर्हि ~~प्रजापुरुष~~ प्रजापुञ्जस्य सन्देहोऽवसानमियात् | तस्मादद्य सीता तथा विदधातु यथा प्रजानां सन्देहः समूलं निरस्येत् |

सीता - (अधोमुखी) (स्वगतम्) किं भूयोऽप्यग्नि-प्रवेशेन परीक्षा दातव्या ? नाहि नाहि |

(प्रकाशम्) आर्यपुत्र ! अहं सर्वथा विश्वासमि यत् मम त्वद्गतचित्तत्वे नास्ति ते स्वल्पोऽपि सन्देहः | अहमपि आत्मानं सर्वथा निष्कलुषं जानामि | ततो न मया पुनरपि काञ्चन परीक्षा प्रदेया | कोटिशोऽद्य त्वां चिराय जगमामि | त्वादेशलङ्घनेन कृतमपराधं शिरसा प्रमार्ज-यामि | प्रतिजन्म त्वमेव मे पतिर्भूयाः |

मातर्वसुन्धरे ! त्वदुदराद्दागतेयं जन्म-दुःखिनी भूयस्त्वदुदरमेव प्रवेष्टुमिच्छति | कृपया देहि मे विवरम् | ~~संसारे संसारन्त्या मे पारं नासीत् सुखाम्बुधेः |~~

संसारे संसरन्त्या मे पारं नासीत् सुखाम्बुधेः |
यस्त्वा वसुन्धरा माता राजर्षिर्जनकः पिता ||

रघुवंशावतंसोऽयं भर्ता दाशरथिर्महान्।
आर्यपुत्र! चिरं जीव त्वत्सुखं हि सुखाय मे।
पातालं विवरं यामि नमः सर्वंसहायदे॥

सुश्रुः — देवि! प्रदर्शितं भवत्या महत्काव्यं सत्पूर्वं मत्पूर्व-
पुरुषकीर्तिप्रकटनेन। अचिरादेवाहम् अयोध्यानगरीं
प्रतिगमिष्यामि। अयोध्यानगरी पूर्वगौरवमाप्नुयाच्चेत्
मयैव महत् गौरवम्। माऽवसीदतु भवती।

राज्यलक्ष्मीः — राजन्! अवसादस्य कोऽत्र विषयः? तद्वचन-
श्रवणेन चित्तं मे मत्तमयूर इव आनन्देन नृत्यति।
तवाशेष कल्याणं भूयात् उच्यतां किं ते प्रियं करोमि?

सुश्रुः — अतः परमपि किं प्रियं स्यात्, तथापीदमस्तु।

(भरतवाक्यम्)

जायतां परमो मोदः सीताराम प्रसादिनाम्।
परमां शान्तिमाप्नोतु सर्वंसहा वसुन्धरा॥
भवन्तु सुखिनः सर्वे रघुवंशप्रमोदिनः।
मधुस्रवतु सर्वत्र जगन्मधुमदस्तु नः॥